# MASTER OF ARTS EXAMINATION, 2024
**[2nd Year, 2nd Semester (Supplementary)]**
**SANSKRIT**
**Course – XIX (A)**
**SANSKRIT MINOR DRAMA**

Time: Two hours Full Marks: 30

## क-विभाग

१. अधोलिखितयो**रेकः** प्रश्नः समाधेयः – $1\times6= 6$

क. उर्वशी कदा केन वा अपहृता जाता ? सा कथं उद्धृता ? गन्धर्वराजेन चित्ररथेन कानि निवेदितानि ?

ख. काशीराजनन्दिनी महाराणी औशीनरी कथं पुरुरवा-उर्वशी इति अनयोः प्रणय-व्यापारं ज्ञातवती - इति विक्रमोर्वशीयमवलम्ब्य लिख्यताम् ।

२. **एकम**वलम्ब्य सुरगिरा व्याख्या कार्या – 5

क. अस्याः सर्गविधौ प्रजापतिरभुच्चन्द्रो नु कान्तप्रभः
श्रृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः ।
वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतुहलो
निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः ।।

ख. ननु वज्रिन एव वीर्यमेतद्
विजयन्ते द्विषदो यदस्य पक्ष्याः ।
वसुधाधरकन्दराद् विसर्पी
प्रतिशब्दोऽपि हरेर्भिनत्ति नागान् ।।

ग. एषा मनो मे प्रसभं शरीरात् पितुः पदं मध्यममुत्पतन्ती ।
सुराङ्गना कर्षति खण्डिताग्रात् सूत्रं मृणालादिव राजहंसी ।।

३. सुरगिरा पुर्णवाक्येन उत्तरं दातव्यम् –

'अवरोहति शैलाग्रं तडित्वानिव तोयदः' –

केन कदा वा इदमुक्तम् ? अत्र रेखाङ्कितस्य पदस्य अर्थः देयः । अत्र कोऽलंकारः ? $\frac{1}{2}+1\frac{1}{2}+1+1$

[ Turn over

## ख-विभाग

४. अधोलिखितयो**रेकः** प्रश्नः समाधेयः – 6

क. राज्ञः उदयनस्य राज्ये वसन्तोत्सवः यथा चित्रितः, तथा लेखनीयः ।

ख. सिंहलराजदुहिता रत्नावली कथं वासवदत्तायाः परिचारिकारूपेण नियुक्ता जाता इति लेखनीया ।

५. अधोलिखित**मेकं** श्लोकमवलम्ब्य व्याख्या (सुरगिरा) करणीया – 5

क. प्रारम्भेऽस्मिन्स्वामिनो वृद्धिहेतौ
दैवेनेत्थं दत्तहस्तावलम्बे ।
सिद्धेर्भ्रान्तिर्नास्ति सत्यं तथापि
स्वच्छाचारी भीत एवास्मि भर्तुः ।।

ख. कीर्णैः पिष्टातकौघैः कृतदिवसमुखैः कुङ्कुमक्षोदगौरै-
र्हैमालंकारभाभिर्भरनमितशिखैः शेखरैः कैङ्किरातैः ।
एषा वेषाभिलक्ष्यस्वविभवविजिताशेषवित्तेशकोशा
कोशाम्बी शातकुम्भद्रवखचितजनेवैकपीता विभाति ।।

ग. क्रोधेद्धैर्दृष्टिपातैस्त्रिभिरुपशमिता वह्नयोऽमी त्रयोऽपि
त्रासार्ता ऋत्विजोऽधश्चपलगणहृतोष्णीषपट्टाः पतन्ति ।
दक्षः स्तौत्यस्य पत्नी विलपति करुणं विद्रुतं चापि देवैः
शंसन्नित्यात्तहासो मखमथनविधौ पातु देव्यै शिवो वः ।।

६. सुरगिरा देवनागरीलिपिमाश्रित्य पूर्णवाक्येन उत्तरं दातव्यम् –
कुसुमसुकुमारमूर्तिर्दधती नियमेन तनुतरं मध्यम् ।
आभाति <u>मकरकेतोः</u> पार्श्वस्था चापयष्टिरिव ।। - केन कदा वा इदमुक्तम् ? अत्र रेखाङ्कितस्य पदस्य अर्थः देयः । अत्र कोऽलंकारः ? $\frac{1}{2}+1\frac{1}{2}+1+1$